# संस्कृतवार्ता:

दिनाङ्क :-  26/02/2025                                              सायम्  - 06:20

इयम् आकाशवाणी

सम्प्रति वार्ताः श्रूयन्ताम्

<u>आदौ मुख्यवार्ताः</u>

- प्रयागराजे विश्वस्य बृहत्तमस्य आध्यात्मिकस्य सांस्कृतिकस्य च समागमस्य महाकुम्भस्य समापनम् अद्य महाशिवरात्रि-पर्वणः शुभदिवसावसरे भविष्यति। लक्षाधिका: श्रद्धालव: पुण्यावसरेऽस्मिन् त्रिवेणि-सङ्गमे पवित्रावगाहनम् अकुर्वन् ।
- भगवते शिवाय समर्पितं महाशिवरात्रिपर्व अद्य सम्पूर्णे हि देशे धार्मिकोत्साहेन समाचर्यते। राष्ट्रपति: उपराष्ट्रपतिः प्रधानमन्त्री च अद्य महाशिवरात्रिपर्वणः पावनावसरे देशवासिभ्यः मङ्गलवचांसि समर्पितवन्तः।
- सीमा-सुरक्षा-बलेन पठानकोट-नगरे अन्ताराष्ट्रियसीमायाम् एकः पाकिस्तानदेशीयः अवैध-प्रवेशकः  गोलिका-प्रहारेण मारितः।
- विदेशमन्त्री डा. एस्. जयशङ्करः अवोचत्  यत् अफ्रिकीय-देशानां स्थितिस्थापका-पूर्तिशृङ्खलां सुदृढीकर्तुं भारत-जापान -देशौ सहयोगं कर्तुं शक्नुतः इति।
- दुबई-ओपन्-टेनिस्-प्रतिस्पर्धायाम्, अद्य सायंकाले प्र-प्रागुपान्त्यचक्रे रोहन-बोपन्ना-इवान-डोडिग-इत्यनयोः युगलस्य  सामुख्यं जूलियन-कैश लॉयड-ग्लासपूल-इत्यनयोः युगलेन सह भविष्यति ।

-----------------------------------

<u>महाकुम्भ:</u>

प्रयागराजे विश्वस्य बृहत्तमस्य आध्यात्मिकस्य सांस्कृतिकस्य च समागमस्य महाकुम्भस्य समापनम् अद्य महाशिवरात्रि-पर्वणः शुभदिवसावसरे भविष्यति। साम्प्रतं यावत् पञ्चाशल्लक्षाधिक पञ्चषष्टि-कोट्यधिक-श्रद्धालवः तीर्थयात्रिणः च गङ्गा-यमुना- सरस्वती-

नदीनां त्रिवेणि-सङ्गमस्य विभिन्नघट्टेषु स्नानम् अकुर्वन् । प्रसारभारत्याः अध्यक्षः नवनीत-सहगलः उक्तवान् यत् देशस्य संस्कृत्या जनान् संयोजयितुम् आकाशवाणी सर्वदैव प्रमुखां भूमिकां निभालयति तथा च सार्वजनिक-प्रसारकरूपेण स्वदायित्वं गभीरतया निर्वहति। महाकुम्भस्य अन्तिमे दिवसे स्वसन्देशे श्रीसहगल: उक्तवान् यत् अष्टचत्वारिंशत्-दिवसानां प्रसारणावधौ आकाशवाण्या: 'कुम्भवाणी' इति वाहिन्या बृहद्जनाः प्रभाविताः। असौ एतदपि उक्तवान् यत् आकाशवाण्याः प्रसारणेन परिलक्षितं यत् श्रोतृजनेषु न केवलं सामान्यजना: अपितु तीर्थयात्रिणः, सन्ताः अखाड़ा-समूहा: च सम्मिलिताः सन्ति।

प्रसारभारत्या: मुख्य-कार्यकार्यधिकारी गौरव-द्विवेदी आकाशवाण्याः 'कुम्भवाणी' इति वाहिन्या: प्रयासानां प्रशंसां कृतवान् । असौ उक्तवान् यत् महाकुम्भ-कुम्भवाणी इत्येतयोः यात्रा अविस्मरणीया वर्तते।

आकाशवाण्याः महानिदेशिकया डा. प्रज्ञा पालीवाल् गौड़ इत्यनया अपि अल्पसमये बृहद्सङ्ख्यायां श्रोतृजनानां प्रापणाय कुम्भवाणी इत्येतस्या: वाहिन्या: अधिगता सफलता प्रशंसिता। असौ एतदपि कथितवती यत् जनेषु जीवने महाकुम्भ-कुम्भवाणी इत्येतयो: महत्त्वपूर्ण: प्रभाव: जात:।

-------------------------------------

<u>महाशिवरात्रिः</u>

भगवते शिवाय समर्पितं महाशिवरात्रिपर्व अद्य सम्पूर्णे हि देशे शिवालयेषु धार्मिकोत्साहेन समाचर्यते । श्रद्धालवः प्रार्थनानां मन्त्राणां च माध्यमेन अथ च व्रतेन ध्यानेन गीतै: भगवन्तं शिवं प्रति स्वश्रद्धां भक्तिं च प्रदर्शयन्ति । राष्ट्रपति-पदासीना द्रौपदीमुर्मुः, उपराष्ट्रपतिः जगदीप-धनखडः, प्रधानमन्त्री नरेन्द्रमोदी च अद्य महाशिवरात्रिपर्वणः पावनावसरे देशवासिभ्यः मङ्गलवचांसि समर्पितवन्तः। एकस्मिन् सामाजिकान्तर्जालीय-सन्देशे राष्टर्पतिना लिखितसन्देशः प्रसारितः यत् सर्वेषु नागरिकेषु देवाधिदेवस्य महादेवस्य आशीर्वादः विराजते भारतं च प्रगतिपथे नैरन्तर्येण वर्धमानं स्यादिति। तत्रैव प्रधानमन्त्री नरेन्द्रमोदी भगवते शिवाय समर्पितः अयं दिव्यकरः दिवसः नागरिकाणां कृते सुखम् समृद्धिं सुस्वास्थ्यं च आनयति इति प्रार्थनां प्रकटितवान् । अत्रावधौ उपराष्ट्रपतिः जगदीप-धनखड: अपि सम्प्रार्थितवान् यत् पवित्रोत्सवोऽयम् आत्मनः अन्वेषणस्य आध्यात्मिक-जागरूकतायाः च प्रतीको विद्यते यो हि

नागरिकान् ज्ञानप्रवाहस्य धैर्यस्य अनुकम्पायाः च मार्गेण गन्तुं प्रेरयति इति। अवधेयं वर्तते यत् मध्यप्रदेशे महाशिवरात्रे: पावनावसरे सर्वेषु प्रमुखेषु मन्दिरेषु भक्तानां सम्मर्दः दृश्यते । अस्माकं वार्ताहर: ज्ञापितवान् यत् महादेवस्य ज्योतिर्लिङ्गयोः महाकालेश्वर-ओङ्कारेश्वरयोः अद्य प्रातःकालादेव भक्तानां दीर्घा पङ्क्तिः दृश्यते इति।

--------------------------------------

<u>सीमा-सुरक्षा-बलम्</u>

सीमा-सुरक्षा-बलेन बी. एस्. एफ्. इत्यनेन अद्य प्रातःकाले पठानकोट-नगरे अन्ताराष्ट्रियसीमायाम् अवैधप्रवेशस्य प्रयासं विफलीकृत्य एकः पाकिस्तानदेशीयः अवैध-प्रवेशकः गोलिका-प्रहारेण मारितः। अस्माकं वार्ताहारः सूचितवान् यत् बी. एस्. एफ्. इत्येतस्य सैनिकाः पठानकोटक्षेत्रस्य ताश्पतन-सीमा-उपरक्षणस्य समीपे सीमापारं प्रातःकाले शङ्कास्पदम् गतिम् अपश्यन् इति। एकः अवैधप्रवेशकः सीमा-पारं कुर्वन् दरीदृष्टः, सीमा-रक्षक-बलस्य जागरूकैः सैनिकैः च प्रतिरोधितः। यदा अवैधप्रवेशकः न अवधानं दत्त्वा, अग्रे गच्छन् आसीत्, तदा सैनिकाः तं निष्प्रभावीकृतवन्तः।

--------------------------------------

<u>विदेशमन्त्री</u>

विदेशमन्त्री डा. एस्. जयशङ्करः अवोचत् यत् अफ्रिकीय-देशानां कृते महत्त्वपूर्ण-उदीयमान-क्षेत्रेषु स्थितिस्थापकता-आपूर्तिशृङ्खलां सुदृढीकर्तुं भारत-जापान -देशौ सहयोगं कर्तुं शक्नुतः इति। जापान-भारताफ्रिका-व्यापार-मञ्चम् आभासिय -माध्यमेन सम्बोधयन् डा. जयशङ्करः निगदितवान् यत्, अफ्रिका-देशस्य वृद्धिः समृद्धिः च न केवलं तस्य जनानां कृते लाभप्रदे भविष्यतः अपि तु विस्तृत-वैश्विक-स्थिरतायाम् आर्थिक-प्रगतिषु च योगदानं करिष्यत: इति। मन्त्रिणा सम्पादितं यत्, अफ्रिका-देशस्य विषये भारतस्य दृक्पातः सर्वदा दीर्घकालिक-पारस्परिक-लाभप्रद-सहभागित्वस्य निर्माणे गहन-मूल-प्रतिबद्धतया मार्गदर्शितः

अस्ति। असौ समुदीरितवान् यत्, भारतम्  आफ्रिकादेशस्य चतुर्थः बृहत्तमः वाणिज्यगतसहभागी अस्ति, यत्र द्वैपाक्षिकव्यापारः प्रायशः  शत- बिलियन्-डालर्-मितं  यावत् भवति।

-----------------------------------------

अमितशाह:

केन्द्रीयगृहमन्त्री भाजपादलस्य वरिष्ठनेता च अमित शाह: उक्तवान् यत् वित्तमन्त्रिणा निर्मला सीतारामण् इत्यनया प्रस्तुतं वित्तसङ्कल्पनापत्रं मध्यमवर्गेभ्यः, कृषकेभ्यः सूक्ष्मलघु-मध्यमोद्योगेभ्यश्च लाभप्रदम् आसीत् । कोयम्बटूर-नगरे भाजपा-कार्यालयस्य उद्घाटनानन्तरं गृहमन्त्रिणा उक्तं यत् आगमिवर्षे तमिलनाडुराज्ये एन. डी. ए. इत्येतस्याः संयुत्या: प्रशासनं भविष्यति।

गृहमन्त्रिणा तिरुवन्नमलाई इत्येतस्मै अथ च दल-कार्यालयेभ्यः पट्टिकाया: अनावरणम् अपि कृतम्।

-----------------------------------------

रेलविभागः

महाशिवरात्रिपर्वणः शुभावसरे सङ्गमे पवित्रावगाहनं कृत्वा प्रत्यागतानां महाकुम्भ - श्रद्धालूनां सौकर्यार्थं रेलविभागेन अद्य मध्याह्ने द्वादशवादनं यावत् प्रयागराजस्य विभिन्नेभ्यः रेलस्थानकेभ्यः चतुर्नवत्यधिकैकशतं यावत् बाह्य-रेलयानानां सञ्चालनं विहितम् । रेलमन्त्रालयेन प्रतिपादितं यत् एतैः रेलयानैः भूयोऽपि दश-लक्षाधिकाः यात्रिणः स्वयात्रां सम्पूरितवन्तः। रेलविभागः अद्य प्रयागराजतः प्रायश: सार्ध-त्रिशताधिकानि रेलयानानि

प्रचालयिष्यन्ति । अत्रावधौ रेलमन्त्री अश्विनी वैष्णवः रेलविभागस्य अध्यक्षः सतीशकुमारश्च समग्रस्य रेलयान-सञ्चालनस्य सूक्ष्मतया निरीक्षणं कुर्वन्तौ स्तः ।

-----------------------------------------

## टेनिस-प्रतिस्पर्धा

दुबई-ओपन टेनिस-प्रतिस्पर्धायाम्, अद्य सायंकाले प्र-प्रागुपान्त्यचक्रे रोहन बोपन्ना-इवान-डोडिग-इत्यनयोः युगलस्य सामुख्यं जूलियन-कैश - विख लॉयड-ग्लासपूल-इत्यनयोः युगलेन सह भविष्यति ।

।। इति वार्ता:।।